उपनिषत्कालीनः शिक्षासम्प्रदायः

Dr. M. Vasantha,

विश्वसंस्कृतिषु भारतीयसंस्कृतिः महत्वपूर्णा प्राचीनतमा च भवति। वेदकालादारभ्य पठनपाठनसुव्यवस्था अत्रासीत् इति निश्चयेन वक्तुं शक्यते। यतो हि वेदाङ्गरूपेण पश्चात् परिगणितानि शिक्षाकल्पव्याकरणज्योतिषच्छन्दोनिरुक्तानि वेदार्थबोधनाय उपायभूतानि पाठ्यसम्प्रदायानि। तानि तु वेदे उक्तानां तत्तदंशानाम् उद्बोधनाय समागतानि। तत्र शिक्षा तु ह्रस्वदीर्घादिवैदिकस्वरोच्चारणप्रतिपादकं शास्त्रं भवति। तद्विषये पाणिनीयशिक्षादिकम् अधुनोपलभ्यते च यदनुसारं मन्त्राणां पठनं पाठनं च कथं भवितव्यमिति अवगन्तुं शक्यते। एवं वेदकालादारभ्य अत्र प्रचलिता काचन शिक्षापद्धतिः आसीत्। उपनिषत्कालीनाः शिक्षापद्धतिप्रकाराः विविधोपनिषत्सु वर्णिताः सन्ति। तदनुसारम् उपनिषत्कालीनशिक्षासम्प्रदायमनुसृत्य किञ्चिदत्र विचार्यते।

सत्यान्वेषणपरैः अस्माकं पूर्वजैः ऋषीश्वरैः स्वायत्तीकृतस्य उद्बुद्धसंस्कारस्य परसंक्रमणार्थं काचन पद्धतिः आविष्कृता दृश्यते। अधुनोपलभ्यमानसौकर्यादीनामभावात् गुरुकुलसम्प्रदायः एव तत्काले आसीदिति ज्ञातुं शक्यते। विविधासु उपनिषत्सु गुरुकुलवासः अध्ययनप्रकारविषयाः च वर्णिताः सन्ति। यथा तैत्तिरीयोपनिषदि दीक्षान्तसमारोहे गुरुः दक्षिणां स्वीकृत्य शिष्यं प्रति आदेशोपदेशादीनि करोति इत्युपवर्णितम्। तद्यथा-वेदमनूच्याचार्यो अन्तेवासिनमनुशास्ति। "सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। यान्यनवद्यानि कार्याणि तानि सेवितव्यानि। नो इतराणि। यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि।"

छान्दोग्ये बालचेष्टापरो श्वेतकेतुः स्वपितुः आज्ञानुसारं गुरुकुलगमनं, तत्र द्वादशवर्षपर्यन्तं उषित्वा वेदशास्त्रादीनामध्ययनं चाकरोत्। तदनन्तरं गृहं प्रत्यागतं तं प्रति किं पठितमिति पित्रा पृष्टे सति सर्वं पठितमिति प्रत्युत्तरं लब्धोऽपि यत् ज्ञातव्यं तद् न ज्ञातमिति विविधपरीक्षणैः पिता तमुद्बोधितवान्। एवंरीत्या उपनिषत्सु किं पठनीयं, केन पठनीयमित्यादिविषयाः परामृष्टाः।

'अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते'[२], 'या विद्या सा विमुक्तये', 'ज्ञानादेव तु कैवल्यम्', 'तमसो मा ज्योतिर्गमय'[३], 'नान्यः पन्था विद्यतेऽयनाय'[४] इत्याद्युपनिषद्वाक्यानि ज्ञानस्यैव प्रामुख्यमुद्घोषयन्ति। ज्ञानं नाम आत्मानात्मविवेको भवतीति विवेकचूडामण्यादौ सम्यक्प्रतिपादितमस्ति। यद् लब्धव्यं तद् लब्ध्वा एव मोक्षो भविष्यतीति सम्यक् बुद्ध्वा तदर्थं बहुभिः बहुधा प्रयत्नः कृतः। ब्रह्मवादिनां तेषां प्रयत्नसाफल्यरूपेण आगता एव उपनिषज्ज्ञानराशिः। तत्र ज्ञानोपायसाधनानि ज्ञानस्य महत्वं च स्वानुभूत्यनुसारं उपवर्णितवन्तः। तत्कालादारभ्य अत्र अध्ययनाध्यापनादिप्रणाली आसीदिति निश्चयेन वक्तुं शक्यते।

प्राचीनकालादारभ्य भारते प्रचलिता गुरुकुलसम्प्रदायरीतिः छान्दोग्योपनिषदादौ विस्तरेण प्रतिपादिता। प्राथमिकविद्याभ्यासः सर्वेषां त्रैवर्णिकानामवश्यं लब्धव्य आसीत्। आचार्यगृहमेव

गुरुकुलम्। अतः गुरुकुलपरिवारान्यतमत्वेन स्थित्वा विद्या अभ्यसनीया। विद्याभ्यासस्य अङ्गत्वेन गृहकर्माणि च ते कृतवन्तः आसन्। अत एव आचार्यः पितृवत् पूज्य इति प्रथा लोके समजनि। विद्यया शिष्यस्य न केवलं ज्ञानजनने अपि तु शारीरिकमानसिकवृद्धिविषयेऽपि आचार्यः श्रद्धालुः आसीत्। यतो हि प्रसन्नचित्ते एव ज्ञानं व्याप्नोति।

प्रसादे सर्वदुःखानां हानिरस्योपजायते।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते।।[५]

अतः शिष्याणां पठनपरिपालनादिकं गुरुरेव कृतवानासीत्। अत एवोक्तं मनुना-

'वेदप्रदानादाचार्यं पितरं परिचक्षते।
न ह्यस्मिन् युज्यते कर्म किञ्चिदा मौञ्जिबन्धनात्।।'

उपनिषत्कालीने सम्प्रदाये आधुनिकविद्याभ्यासवत् एकस्मिन् विषये निष्णातत्वं न कांक्षितम् इत्यप्यवगम्यते। तेषां मुख्योद्देश्यन्तु विद्याभ्यासेन शरीरं मनश्च बलवत्तरं कृत्वा सत्यद्रष्टा ज्ञानी च भवितुं शिष्ये योग्यतानयनार्थं गुरवः दत्तश्रद्धाः आसन्। उक्तं च छान्दोग्ये-'बलं वाव विज्ञानाद् भूयो अपीह शतं विज्ञानवतामेको बलवान कम्पते इति। अतः अन्नपानादिना वृद्धौ प्राप्ते नीरोगशरीरे एव बलवती विद्या प्रतिष्ठातुं शक्यते। अत्र बलशब्देन कायिकं मानसं च बलं निर्दिष्टमित्यवगम्यते। गुरुसेवादिकं स्वाध्यायादिकं च यथोचितं बलवतामेव लब्धुं शक्यतेति बलमपि सम्पादनीयमिति उपदिदेश। परन्तु बलापेक्षया ज्ञानस्यैव महत्वं सर्वत्रोक्तं अस्ति। बलसम्पादनार्थं ये आदेशाः ते तु नीरोगतः एव ज्ञाप्यते। आरोग्यवतः एव सम्यक् पठितुं शक्यतेति निरूपितमस्ति। तादृशज्ञानमिव यानि अमूर्तानि सूक्ष्मतत्त्वानि तानि यथोचितं सन्निवेशयितुं नान्यस्य शक्यते। अतः ज्ञानार्थिनां आरोग्यपरिपालनमपि अत्यन्तमपेक्षणीयमिति ज्ञातुं शक्यते।

गुरुकुले शिष्याणां कृते परीक्षा आसीत्। गुरौ विश्वासः भयभक्तिबहुमानादिकं च अवश्यं भवितव्यं शिष्याणाम्। तादृशशिष्याणामेव प्रशान्तचित्ततया ज्ञानार्जनवृत्तिः अन्ते भविष्यति। तद्यथा-

प्रशान्तचित्ताय जितेन्द्रियाय
प्रहीणदोषाय यथोक्तकारिणे।
गुणान्वितायानुगताय सर्वदा
प्रदेयमेतत्सततं मुमुक्षवे।।[६]

आचार्यः शिष्ये सर्वदा ज्ञानार्जनाकाङ्क्षा उत्पादनीया। तस्य आकाङ्क्षापूर्तिः एव विद्याभ्यासपूर्तिरिति ते निर्णीतवन्तः। तदर्थं बहूनि परीक्षणनिरीक्षणानि च ते कल्पितवन्तः। नो चेत् यत्किञ्चित् ज्ञात्वा सर्वं ज्ञातमिति ते गर्विष्ठाः भवेयुः। तेषां कृते आरुणिश्वेतकेतुसंवादः उत्तमोदाहरणत्वेन परामर्शमर्हति। एवंविधा शिष्यस्य पठनमूल्यनिर्णयार्थं परीक्षा तत्काले आसीत्। तत्त्वमसि इति महावाक्यबोधनार्थं नववारं श्वेतकेतुं विविधदृष्टान्तप्रदर्शनपुरःसरं आदिष्टवान्। ब्रह्मचर्यं विद्योपार्जनार्थं अपेक्षणीयं, यतः ब्रह्मचर्येणैव कर्मसिद्धिः मनोनैर्मल्यं च लब्धुं शक्यते। किं बहुना देवराट् इन्द्रोऽपि स्वप्रभावप्रौढी स्वर्गसुखादिकं च त्यक्त्वा एकोत्तरशतसंवत्सरपर्यन्तं प्रजापतेः समीपं गत्वा ब्रह्मचारी सन् गुरुसेवां कृत्वा आत्मज्ञानमार्जितवानिति श्रुतिः। छान्दोग्येऽन्यत्र एवं श्रूयते-ज्ञानार्जनाय द्वौ छात्रौ

गुरुसमीपं गत्वा ज्ञानभिक्षां याचितवन्तौ। तत्र प्रथमः प्रथमदिने लब्धोपदेशेन आत्मज्ञानमलब्ध्वा देहात्मसम्बन्धी सन् कालं व्यापृतवान्। द्वितीयस्तु पक्वधीः विचारशीलः च आसीत्। अत एव स तत्र गुरुकुले स्थित्वा गुरुमुखाद् लब्धज्ञानसननमननादिकं कृतवान्। ततो लदपूर्णमिति ज्ञात्वा पुनः गुरुं प्राप्य विद्यां याचितवान्। गुरुः तस्य कृते एकोत्तरशतवर्षपर्यन्तं श्रवणमननदिध्यासनपूर्वकोपासनद्वारा आत्मज्ञानं अवाप्तुं शक्यते इति उक्त्वा तंम् उद्बोधितवान्। छान्दोग्योपनिषदि चतुर्थाध्याये पितुः श्रद्धा पुत्रस्य विद्याविषये यादृशी भवितव्यमिति सम्यक् उक्तमस्ति। तद्यथा-'उपकोसलो ह वै कामलायनः सत्यकामे जाबाले ब्रह्मचर्यमुवास। तस्य ह द्वादश वर्षाण्यग्नीन् परिचचार। स ह स्मान्यान् अन्तेवासिनः समावर्तयस्तं ह स्मैव न समावर्तयति। तं होवाच-तप्तो ब्रह्मचारी कुशलमक्षीन् पर्यचारीत्। मा त्वाऽक्षयः परिप्रवोचन्म प्रब्रूह्यस्मा इति। तस्मै हाप्रोच्यैव प्रवासं चक्रे। सह व्याधिना अनशितुं दध्रे। तमाचार्यजायोवाच। स होवाच-बहव इमे अस्मिन् पुरुषे कामाः नानात्ययाः। व्याधिभिः प्रतिपूर्णोऽस्मि। नाशयिष्यामीति।' अत्र उपकोसलस्य कृत्यनिष्ठता तथा गुरुभक्तिश्च दृष्ट्वा गुरुपत्नी गुरुं प्रति विद्योपदेशार्थं सत्यकामं प्रति याचितवती। तस्य परिचरणेन सन्तुष्टा अग्निदेवता तं विद्यां न दत्तवानिति मत्वा तदाचार्यस्यैव च्युतिः इति विचिन्तितवती। परन्तु दृढचित्तस्य उपकोसलस्य स्वकीयोपासनामूर्तिरूपे अग्निदेवे पूर्णविश्वासो आसीत्। पूर्वं स्वस्य कृते अग्निदेवः ब्रह्मविद्यां प्रदत्तवान् तद्वत् अधुना उपकोसलस्य कृतेऽपि अवश्यं तत्करिष्यत्येव इति मत्वा स तं प्रति विद्यामदत्वैव देशान्तरं गतवान्। अतः तत्काले स्वाचार्ये दृढविश्वासः शिष्याणामासीदिति अवगन्तुं शक्यते।

इतरशास्त्रवत्केवलं सामान्यग्रन्थादिकमवलोक्य स्वायत्तीकर्तुं न शक्यं भवति आत्मज्ञानम्। तत्तु सद्गुरुमुखादेव अवश्यं लब्धव्यं भवति। गुरुस्तु उत्तमशिष्यं प्रति स्वानुभवज्ञानपुरःसरं आत्मज्ञानावाप्तिमार्गं निर्दिशति। तदनुसारं श्रवणमननदिध्यासनपूर्वं गुरूपदिष्टवेदान्तवाक्येषु अनलसः सन् प्रयत्नः क्रियते चेत् आत्मज्ञानस्यानुभवः भविष्यति। गुरुस्तावत् शिष्यगुणान् परीक्ष्य तस्यात्मज्ञानोपदेशः तथा इतः परम् अवश्यं कर्तव्यानि चादिशति। शिष्यस्य अन्तःकरणे वर्तमानं सर्वमप्याभिमानिकं संस्कारप्रकारं आत्मज्ञानप्रकाशेन विनश्यति तदनु 'अहं ब्रह्मास्मी'ति अनुभवः तस्य भविष्यति। अत एव गुरुशब्दः ब्रह्मविद्यायां महत्वपूर्णः एव। उक्तं च-

'गुकारो अन्धकारश्च रुकारो तन्निवर्तकः।

अन्धकारनिवर्तत्वात् गुरुरित्यभिधीयते'।। इति। अत्रत्य 'गु' इत्यक्षरः अन्धकारस्यार्थवाची रु इति तन्मोचकश्च। अत एव गुरुः अन्धकारविमोचकः इत्यर्थो अन्वर्थकः। तत्काले वयोऽवस्थादिकं ज्ञानार्जनविघातः नासीत्। तत्तु मुण्डक-माण्डूक्य-प्रश्नादि उपनिषद्भ्यः ज्ञातुं शक्यते। अन्यच्च गुरुशिष्ययोः दृढबन्धः आसीत्। अत एव शान्तिपाठादौ ओङ्कारपरब्रह्म आवां भवतु पोषयतु इत्याद्यर्थप्रकाशकशान्तिपाठपूर्वकं अध्ययनारम्भः कृतः। एवं सर्वत्र विद्यायाः महत्वं तद् अध्येतृ-अध्यापकानां गुणाः पठनक्रमाः च तत्र तत्रोक्ताः सन्ति।

ब्रह्मविद्या तु केवलं मोक्षपर्यन्तं एवेति मन्तव्यम्। सा च मनुष्याणां प्रायोगिकजीवने शान्तिमार्गस्य आदेशपरका च भवति। तथा चोक्तं कठोपनिषदि-

मृत्युप्रोक्तां नाचिकेतोऽथ लब्ध्वा

विद्यामेतां योगविधिं च कृत्स्नम्।
ब्रह्म प्राप्तो विरजोऽभूद्विमृत्यु-
रन्योऽप्येवं यो विदध्यात्ममेव।।

एवं ब्रह्मविद्या सर्वेषां मृत्युतरणोपायभूता आनन्ददायिका च भवति। अतः तदर्थं यत्नः करणीय इति।

References:

१. तैत्तिरीयोपनिषत्, शिक्षावल्ली एकादशानुवाके।
२. (ईशावास्योपनिषत् ११)
३. (बृ. उ. १.३.२८)
४. (श्वे. उ. ३.८६.१५)
५. भगवद्गीता, २/६५.
६. (मनुस्मृतिः २/१७१.
७. (छा. उ. ७.८.१.
८. (उपदेशसाहस्री १६/७२.
९. (छान्दोग्योपनिषद् ४.१०.१-३.

उपयुक्तग्रन्थसूची

१. ईशादिदशोपनिषदः, मोतीलाल बनारस्ज़ीदास, १९७८.
२. तैत्तिरीयोपनिषत्, श्रीरामकृष्णमठम्, पुरन्नाट्टुकरा, त्रिच्चूर्.
३. ईशावास्योपनिषत्, गीताप्रेस्, गोरखपुर, १९७८.
४. Women Education and Upaniṣadic System of Education, K. N. Mishra, Chugh Publications, Allahabad, 1993.
